घञ्। २अपकृष्टपके। "तच उत्कृत्तमनवपाकानां संवत्सम्" शत०ब्रा०।

**अवपात** पु० अव+पत–भावे घञ्। अधःपतने। पत–णिच्–भावे अच्। २पातने "यस्यावपाते गर्भस्य पातने "चोत्तमोदमः" या०स्मृ०। आधारे घञ्। ३गर्त्ते "अवपातस्तु हस्त्यर्थे गर्त्ते छन्ने तृणादिना" इति यादवोक्ते गजधारणार्थे ४गर्त्तभेदे च "रोधांसि निघ्नन्नवपातमग्नम्" रघुः

**अवपात्र** त्रि० अवरं भोजनायोग्यं पात्रं यस्य। यस्य भोजनेन पात्रं दुष्टेऽन्यस्य भोजनायोग्यता भवति तादृशे पतितम्लेच्छादौ जने। [अपपात्रितशब्दार्थे।

**अवपात्रित** त्रि० अवपात्र+क्रत्यर्थे णिच्–क्त। भिन्नोदकीकृते

**अवपाद** पु० अव+पद–घञ्। अधःपतने "देवा वै आदित्याः स्वर्गाल्लोकादवपादाद्बिभियुः" ता०ब्रा०।

**अवपाशित** त्रि०अवपाशः समन्तात् पाशोजातोऽस्य तार०इतच्। पाशबद्धे "पश्यास्यैव हि कण्ठे त्वां कालपाशावपाशितम्" रा०

**अवपीड** त्रि०अवपीडयति अव–पीड–अच्। १समन्तात् पीडके "चिकित्साविशेषे पु०२वेगान्तेषु चावपीडं दद्यात्" सुश्रु० "प्रतिमर्शोऽवपीडश्च नस्यं प्रधमनं तथा। शिरोविरेचनं चेति नस्तः कर्म्म च पञ्चधा" इति चक्रदत्तोक्ते ३नासिकाचिकित्साभेदे च। तल्लक्षणं तत्रैवोक्तं यथा "अवपीड्य दीयते यस्मादवपीडस्ततस्तु सः। शोधनः स्तम्भनश्च स्यादवपीडो द्विधा मत" इति।

**अवपीडन** न० अव+पीड–णिच् ल्युट्। १निष्पीडने। सुश्रुतोक्ते २पीडनदोषभेदे "अतिपीडितता शिथिलपीडितताभूयोभूयोवपीडनं कालातिक्रम इति चत्वारः पीडनदोषाः"। युच्। अवपीडना निष्पीडने स्त्री "अङ्गावपीडनायाञ्च व्रणशोणितयोस्तथा" सुश्रु०। [तीर्ण्णे च।

**अवप्लुत** त्रि०अव+प्लु–क्त। समन्तात् सिक्ते १आर्द्रीभूते २अव-

**अवबन्ध** पु० अवबध्यते आच्छाद्यते नेत्रवर्त्मानेन करणे घञ्। सुश्रुतोक्ते नेत्रवर्त्माश्रये। "पृथग्दोषाः समस्ताश्च यदा वर्त्मव्यपाश्रयाः। शिरा व्याप्यावतिष्ठन्ते वर्त्मस्वधिकमूर्च्छिता" इत्युपक्रम्य "उत्सङ्गिन्यथ कुम्भीका पोथिक्यो वर्त्मशर्कराः। तथार्शवर्त्म शुष्कार्शस्तथैवाञ्जननामिका। बहलं वर्त्म यच्चापि व्याधिर्वर्त्मावबन्धकः" इत्यादीन्युक्त्वा "न समं छादयेदक्षि भवेद्बन्धः स वर्त्मन" इति लक्षिते १रोगभेदे वर्त्मावबन्ध इत्येकं नामेत्युचितम्। भावे घञ्। समन्तात् २बन्धने च। [बन्धे च।

**अवबाधा** स्त्री अव+बाध–अ। १समन्तात् बाधायां २प्रति-

**अवबाहुक** पु० अवबद्धो बाहुर्येन प्रा०ब०। सुश्रुतोक्ते वायुरोगभेदे यथा "अंसदेशस्थितोवायुः शोषयित्वांसबन्धनम्। शिराश्चाकुञ्च्य तत्रस्थो जनयत्यवबाहुकम्"। [ज्ञातरि।

**अवबुद्ध** त्रि० अव+बुध–कर्म्मणि क्त। १ज्ञाते कर्त्तरि क्त।

**अवबोध** पु०अव+बुध–भावे घञ्। जागरणे। "यौ तु स्वप्नावबोधौ तौ भूतानां प्रलयोदयौ" मनुः। २ज्ञानमात्रे च "स्वभर्तृनामग्रहणाद्बभूव सान्द्रे रजस्यात्मपरावबोधः" रघु० "भावावबोधकलुषा दयितेव रात्रौ" रघुः। प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोध इष्यते" सा०द०।

**अवबोधक** पु०अवबोधयति अव+बुध–णिच्–ण्वुल्। १अर्के। नृपाणां निद्राभङ्गकारके २स्तुतिपाठकादौ च ३ज्ञापके त्रि०।

**अवबोधन** न०अव+बुध–णिच्–ल्युट्। ज्ञापने। "स्वेतरार्थानच्छिन्नयत्स्वार्थस्यावबोधने" शब्दशक्ति०।

**अवभर्ज्जित** त्रि०अव+भ्रस्ज–क्त भर्ज्जादेशः। १भ्रष्टे २दग्धे च।

**अवभाषण** न० अव+भाष–ल्युट्। कथने "व्यापारान्तरसक्त्यन्यथावभाषणविलोकनादिकरो" सा०द०।

**अवभास** पु० अव+भास–भावे घञ्। १ज्ञाने २प्रकाशे अन्यस्य अन्यरूपेण प्रकाशरूपे ३मिथ्याज्ञाने च।

**अवभासक** त्रि० अवभासयति अव+भास–णिच् ण्वुल्। १प्रकाशके सर्व्वावभासके कूटस्थे चैतन्ये न०। "यस्य भासा सर्व्वमिदं विभाति" श्रुतेः "यदादित्यगतं तेजो जगद्भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्" गीतोक्तेस्तस्य सर्व्वावभासकत्वम्।

**अवभासित** त्रि०अव+भास+णिच्–कर्म्मणि क्त। प्रकाशिते।

**अवभृथ** पु० अव+भृ–क्थन्। मुख्ययज्ञसमाप्तौ क्रियमाणे १यज्ञशेषकर्म्मणि,यज्ञाङ्गभूते यज्ञान्तकार्य्ये २स्नाने च। "नावभृथं सरस्वत्याम्" कात्या०२४,६,२२, "सरस्वत्यां नावभृथं कुर्य्यात्" कर्कः "परिपार्श्वेषूदकेषु" "असत्स्वहूत्य ततः" कात्या० २४,६,२३,२४ "महति पात्रे कटाहादौ" कर्कः। अवभृथस्नानविधिस्तु तैत्तिरीयब्राह्मणे २अष्टके ६अ०६अनु०, "यद्देवा देवहेडनम्" इत्यारभ्य "समिदसि जगन्नोधि "चेत्यनुवाकपर्य्यन्ते उक्तः। "स्नातवत्यवभृथे ततस्त्वयि" माघः "सर्वैनोऽभृथस्नातो ह्यश्वमेधे विशुध्यते"। "तथाऽश्वमेधावभृथस्नानाद्वा शुद्धिमाप्नुयात्" या०स्मृ० "भुवं कोष्णेन कुण्डोध्नी मेध्येनावभृथादपि" "प्रीत्याश्वमेधावभृथार्द्रमूर्त्तेः" "भ्रातरावभृथाप्लुतो मुनिः" इति च रघुः।

**अवभ्रट** त्रि० अवनता नासिका प्रा०स० नतार्थे नासिकाया-